**GOVERNEMENT OF KARNATAKA**

**KARNATAKA SCHOOL EXAMINATION AND ASSEMENT BOARD**

6th CROSS, MALLESHWARAM, BENGALURU-560 003 2026-27

**II PUC MODEL QUESTION PAPER- 4**

**Subject: 09 - SANSKRIT** **Maximum Marks: 80**

**Time: 3.00 Hours** **No. of Questions: 44**

---

ಸೂಚನೆಗಳು :

**1.** ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ **A, B, C** ಮತ್ತು **D** ಗಳೆಂಬ **4** ವಿಭಾಗಗಳಿವೆ.

**2.** ಎಲ್ಲಾ ವಿಭಾಗಗಳೂ ಕಡ್ಡಾಯವಾಗಿರುತ್ತವೆ.

**3.** ಆಯಾ ವಿಭಾಗಗಳಲ್ಲಿ ಕೇಳಲಾದ ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಗಳನ್ನು ಆಯಾ ವಿಭಾಗಗಳಲ್ಲಿ ಪ್ರತ್ಯೇಕವಾಗಿ ಸೂಚಿಸಿದ ಸೂಚನೆಯಂತೆ ಉತ್ತರಿಸಬೇಕು.

**4. 'A'** ವಿಭಾಗದಲ್ಲಿನ ಪ್ರಶ್ನೆಗಳಿಗೆ ಪ್ರಥಮವಾಗಿ ಬರೆದ ಉತ್ತರಗಳನ್ನು ಮಾತ್ರ ಮೌಲ್ಯಮಾಪನಕ್ಕೆ ಪರಿಗಣಿಸಲಾಗುವುದು.

Instructions :

1. This question paper consists of four parts as A, B, C and D.

2. All parts are compulsory.

3. Every part should be answered as instructed separately.

4. For part –'A' questions , only the first written answers will be considered for evaluation.

## PART-A

I. अधो निर्दिष्टानां प्रश्नानां समीचीनं विकल्पं चित्वा उत्तरं लिखत । 10 × 01 =10

1) एषः भरतः इत्युच्यते ।

अ) भानुः । आ) हनुः ।

इ) मनुः । ई) धेनुः ।

2) परदुःखेन के अत्यन्तदुःखिनः भवन्ति ?

अ) भीरवः । आ) साधवः ।

इ) पशवः । ई) गुरवः ।

3) के निर्विमर्शाः ?

अ) कुरवः । आ) कवयः ।

इ) गुरवः । ई) भीरवः ।

4) शकुन्तलायाः पुत्रकृतकस्य मृगपोतकस्य नाम किम् ?

अ) दीर्घापाङ्गः ।

आ) चञ्चलाङ्गः ।

इ) कमलाक्षः ।

ई) सुनयनः ।

5) राणाप्रतापस्य पूर्वजानाम् अमात्यः कः ?

अ) कञ्चुकी ।

आ) भामाशाहः ।

इ) बीरबल्लः ।

ई) अमरसिंहः ।

6) श्वेतकेतोः तनयः कः ?

अ) हंसः ।

आ) चन्द्रापीडः ।

इ) पुण्डरीकः ।

ई) कपिञ्जलः ।

7) सुन्दरस्य पिता कः ?

अ) शङ्करः ।

आ) गणेशः ।

इ) महेशः ।

ई) गोविन्दः ।

8) "विधिविलसितम्" इति पाठे वज्रकीटप्रसङ्गः कर्णस्य इमं गुणं सूचयति ।

अ) सहनगुणम् ।

आ) दुर्गुणम् ।

इ) श्रवणगुणम् ।

ई) मननगुणम् ।

9) "सत्पुरुषव्रते" इदं सत्पुरुषलक्षणं वर्तते ।

अ) परहास्यम् ।

आ) परपीडनम् ।

इ) दुर्जनसङ्गः ।

ई) सूनृता वाक् ।

10) ध्वन्यालोकः कन्नडभाषायां केन अनूदितः ?

अ) कुवेम्पुमहोदयेन ।

आ) शिवरामकारन्तमहोदयेन ।

इ) डा. के. कृष्णमूर्तिमहोदयेन ।

ई) बि.एम.श्री महोदयेन ।

II. मञ्जूषातः सूक्तं पदं चित्वा, रिक्तं स्थानं पूरयत । 05 × 01 = 05

11) i) ___________ ददाति चेत् सन्ततिच्छेदो भविष्यति ।

ii) भृत्यैरानाय्य सहसा ___________ उदघाटयत् ।

iii) सर्वः सगन्धेषु _________ ।

iv) कष्टपरम्परायाः अपि काचन ____________ भवेत् ।

v) संक्षेपतश्चेत् स्मर्तव्या _______________ ।

| सर्वावयवसुन्दरी , कौतुकात् , पुत्रं , विश्वसिति , सीमा , आननम् । |
|---|

III. संयोजयत । 05 × 01 = 05

12)

| क | ख |
|---|---|
| अ) वृद्धपक्षिराजः | i) कुङ्कुमम् । |
| आ) परिव्राड् | ii) चिरञ्जीवी । |
| इ) शार्ङ्गरवः | iii) कामवशगः । |
| ई) अकबर् बादशाह | iv) कण्वशिष्यः । |
| उ) ललाटे | v) गुरुशापम् । |
| | vi) दिल्लीश्वरः । |

## PART - B

IV. द्वित्रैः वाक्यैः संस्कृतभाषया, कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत । (चतुर्णामेव) 04 × 02 = 08

13) पुराणभारते उल्लिखितानि तीर्थक्षेत्राणि कानि ?

14) पक्षिभिः भणितं मित्रस्य लक्षणं किम् ?

15) पुण्डरीकस्य अनुरागं महाश्वेता कथं जानाति ?

16) तरुणः किमर्थं क्रोधमूर्च्छितः अभवत् ?

17) कर्णं प्रति परशुरामोपदेशं लिखत ।

18) सत्पुरुषव्रतं किम् ?

19) कृष्णशास्त्रिणां औदार्यम् ।

V. पाठनाम उल्लिख्य, कः कं प्रति अवदत् इति संस्कृतभाषया लिखत । (चतुर्णामेव) 04 × 02 = 08

20) यं कमेवं मा भक्षय ।

21) सुखानि ते भर्तृकुलदेवताः वितरन्तु ।

22) उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ।

23) कुत्रापि गत्वा धनं संग्रहिष्यामि ।

24) धैर्यधना हि साधवः ।

25) अहो! गुरुकुलवैभवम् ।

26) सः यत्र कुत्रापि भवतु कालेज् आनेतव्य एव ।

## PART - C

VI. पाठनाम उल्लिख्य, श्लोकानाम् अनुवादं कन्नडभाषया आङ्ग्लभाषया वा कुरुत । (द्वयोरेव) 02 × 03 = 06

27) ज्ञेयं तद्भारतं वर्षं सर्वकर्मफलप्रदम् ।
अत्र कर्माणि कुर्वन्ति त्रिविधानि तु नारद ॥

28) तथेति चागता यावद्गङ्गां न प्राप्नुवन्ति ते ।
राजपुत्रः किमप्येकस्तावत्तस्यामवातरत् ॥

29) मूढः स्यामहमेषा वा वदेन्मिथ्येति संशये ।
दारत्यागी भवाम्याहो परस्त्रीस्पर्शपांसुलः ॥

30) मनसा चिन्तितं कार्यं वाचा नैव प्रकाशयेत् ।
मन्त्रवत् रक्षयेत् गूढं कार्ये चापि नियोजयेत् ॥

VII. दशवाक्यैः संस्कृतभाषया, कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत । (चतुर्णामेव) 04 × 05 = 20

31) 'पुराणभारतम्' इति पाठानुसारेण भारतस्य भौगोलिकं वर्णनं स्ववाक्यैः कुरुत ।

32) विक्रमादित्यस्य परोपकारगुणं वर्णयत ।

33) 'निर्विमर्शा हि भीरवः' इति शीर्षिकां समर्थयत ।

34) शार्ङ्गरव-दुष्यन्तयोः संवादस्य स्वारस्यं स्ववाक्यैः विवृणुत ।

35) रोटिकाप्रसङ्गद्वारा महाराणाप्रतापस्य परिवारस्य कष्टमयं जीवनम् अधिकृत्य लिखत ।

36) पुण्डरीकमहाश्वेतयोः सरससंवादस्य स्वारस्यं स्वावाक्यैः विवृणुत ।

37) 'सा शान्तिः' इति पाठस्य सारांशं स्ववाक्यैः संगृह्य लिखत ।

## PART - D

VIII. यथानिर्देशं लिखत । (त्रयाणामेव) 03 × 03 = 09

38) सन्धिं विभजत / योजयत । (त्रयाणामेव)

अ) वहन्तीव ।

आ) आदायैताम् ।

इ) किमप्याश्चर्यम् ।

ई) यत् + अहम् ।

उ) विन्ध्यः + च ।

39) विग्रहवाक्यं लिखत / समस्तपदं लिखत । (त्रयाणामेव)

अ) सागरसंवृतः ।

आ) कन्यारत्नम् ।

इ) देशान्तरम् ।

ई) अहनि अहनि ।

उ) भिन्ना स्थितिः न भवति यस्य सः ।

40) पदपरिचयं कुरुत । (त्रयाणामेव)

अ) भूत्वा ।

आ) उन्नमय्य ।

इ) स्मरन् ।

ई) प्रवेशयितुम् ।

उ) निर्गतः ।

41) प्रयोगं परिवर्तयत ।

अ) त्वं मौनं त्यक्त्वा उक्तवान् ।

अथवा

आ) कृष्णरावेण इयं घटना स्मर्यते ।

42) अलङ्कारं सलक्षणं निर्दिशत ।

अ) कुसुमागन्धेन मधुकरीव आकृष्यमाणा ।

अथवा

आ) विद्यारत्नेन यो हीनः स हीनः सर्ववस्तुषु ।

IX. संस्कृतभाषया अनुवदत । 01 × 05 = 05

43) ಒಮ್ಮೆ ವಿಶ್ವಾಮಿತ್ರ ಮಹರ್ಷಿಗಳು ದಶರಥ ಮಹಾರಾಜನ ಆಸ್ಥಾನಕ್ಕೆ ಬಂದರು. ಯಜ್ಞರಕ್ಷಣೆಗಾಗಿ ಬಾಲಕರಾದ ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ತಮ್ಮ ಜೊತೆ ಕಳುಹಿಸುವಂತೆ ಕೇಳಿಕೊಂಡರು. ಪುತ್ರವಾತ್ಸಲ್ಯದಿಂದ ದಶರಥನು ದುಃಖಿತನಾದನು. ಕುಲಪುರೋಹಿತರಾದ ವಸಿಷ್ಠರು ವಿಶ್ವಾಮಿತ್ರರ ಬೇಡಿಕೆಯನ್ನು ಪೂರೈಸುವಂತೆ ದಶರಥನಿಗೆ ನುಡಿದರು. ಲೋಕಕಲ್ಯಾಣಕ್ಕಾಗಿ ದಶರಥನು ರಾಮಲಕ್ಷ್ಮಣರನ್ನು ಕಳುಹಿಸಿದನು.

Once the sage Vishwamitra came to the court of the king Dasharatha. He requested to send the boys Rama and Lakshmana to protect his sacrifice. Dasharatha felt sad due to affection towards his children. Vasishtha, the preceptor of the family, advised Dasharatha to fulfil Vishwamitra's request. Dasharatha sent Rama and Lakshmana for the welfare of the world.

X. इमं परिच्छेदं पठित्वा, प्रश्नानाम् उत्तराणि लिखत । 04 × 01 = 04

44) लोकोपकारकेषु गुणेषु धैर्यम् अन्यतमम् । यदि धैर्यं न स्यात् तदा सर्वेषां जनानां जीवनम् अतीव दुःखमयं स्यात् । ये धैर्यं धृत्वा कार्यं कुर्वन्ति ते अवश्यमेव साफल्यं प्राप्नुवन्ति । धैर्यस्य प्रशंसा धर्मशास्त्रे, इतिहासे, पुराणे सर्वत्र उपलभ्यते । कष्टकाले धैर्यमेव मुख्यतमः आश्रयः भवति । अशोकवने सीतापि धैर्यमाश्रित्य स्वशरीरत्यागात् विरराम । पाण्डवाः अपि बहु दुःखं सहमानाः धैर्यबलेन एव महाभारतयुद्धे जयं प्राप्तवन्तः । पुरा देवाः अमृतप्राप्तये समुद्रस्य मन्थनम् अकुर्वन् । मन्थनात् हालाहलं विषं प्राप्तम् । तथापि धैर्येणैव ते ईप्सितम् अमृतम् अलभन्त । अयमेव धैर्यस्य प्रभावः ।

प्रश्नाः -

i. लोकोपकारकेषु गुणेषु किम् अन्यतमम् ?

ii. धैर्यस्य प्रशंसा कुत्र उपलभ्यते ?

iii. पाण्डवाः केन महाभारतयुद्धे जयं प्राप्तवन्तः ?

iv. पुरा देवाः किमर्थं समुद्रस्य मन्थनम् अकुर्वन् ?